वर्त्तिकार्थं न चाददेत् । न मिश्रीकृत्य दद्यात्तु दीपं स्नेहान् घृतादिकान् । कृत्वा मिश्रीकृतं स्नेहं तामिस्रं नरकं व्रजेत् । वसामज्जास्थिनिर्यासैः स्नेहैः प्राण्यङ्गसम्भवैः । प्रदीपं नैव कुर्य्यात्तु कृत्वा पङ्के विषीदति । अस्थिपात्रेऽथ वा गव्ये दुर्गन्धाद्युपवासिनि । नैव दीपः प्रदातव्यो विबुधैः श्रोविष्टये । नैव निर्वापयेद्दीपं कदाचिदपि यत्नतः । सततं लक्षणोपेतं देवार्थमुपकल्पितम् । न हरेज्जनतो दीपं तथा लोभादिना नरः । दीपहर्त्ता भवेदन्धः काणो निर्वापको भवेत् । उद्दीप्तदीपप्रतिमः काष्ठकाण्डसमुद्भवः । विल्वेध्मोद्भवमेवाथ दीपालाभे निवेदयेत् । उल्मुकं नैव दीपार्थे कदाचिदपि चोत्सृजेत् । प्रसन्नार्थन्तु तं दद्यादुपचाराद्बहिः कृतः । एवं वां कथितो दीपो धूपञ्च शृणुतं सुतौ !" । श्राद्धे वस्त्रवर्त्तियुक्तदीपनिषेधो यथा "दीपं वर्जत् वस्त्रवर्त्ति प्रत्यक्षं तैलमेव च"। योगिनी०त० २य भागे ५पटलः ।

पुरुषस्य दीपनिर्वापणे दोषो यथा । "दीपनिर्वाणणात् पुंसः कुष्माण्डच्छेदनात् स्त्रियः । अचिरेणैव कालेन वंशनाशो भवेद्ध्रुवम्" ति०त० । देवदत्तदीपस्य तु निर्वापणम् विधानपारिजाते उक्तं यथा "स्वयं निर्वापितं दीपमाजिघ्रन्ति सुरारयः । तस्मान्निर्वापयेद्दीपं देवानां प्राणतुष्टये" । कार्त्तिककृष्णचतुर्दश्यां नरकनिवृत्तये दीपदानं यथा "नरकाय प्रदातव्यो दीपः संपूज्य देवताः" तिथितत्त्वधृतलिङ्गपुराणम् ।

"स्नाने धूमे तथा दीपे नैवेद्ये भूषणे तथा । घण्टानादं प्रकुर्वीत तथा नीराजनेऽपि च । विधानपारिजातोक्तः दीपदाने घण्टानादोविधेयः । शिवालये दीपोद्दीपनमाहात्म्यं काशीख० १३अध्याये दृश्या दिङ्मात्रमत्रोच्यते "स दीपवासनायोगात् बहून् दीपान् प्रदीप्य वै । अलकायाः पतिरभूद्रत्नदीपशिखाश्रयः" । दीपवर्त्तिश्च कर्पूरगर्भिणी कार्य्या "वर्त्त्या कर्पूर गर्भिण्या सर्पिषातिलजेन वा । आरोप्य दर्शयेद्दीपानुच्चैः सौर॰शालिनः" शारदाति० । तन्त्रसारे "कर्पूरादियुता वर्त्तिः सा च कार्पास । निर्मिता । सप्तावृत्ता सुसंक्लृप्तो दीपः स्याच्चतुरङ्गुलः" कार्त्तवीर्य्यप्रियार्थदीपविशेषस्तु कार्त्तवीर्यदीपशब्दे १९८४ पृ०उक्तः । दीपदानफलादिकम् भा०अनु०९८अ०उक्तं यथा "दीपदाने प्रवक्ष्यामि फलयोगमनुत्तमम् । यथा येन यदा चैव प्रदेया यादृशाश्च ते । ज्योतिस्तेजः प्रकाशं वाऽप्यूर्द्ध्वगञ्चापि वर्ण्यते । प्रदानं तैजसं तस्मात्तेजो वर्द्धयते नृणाम् । अन्धन्तमस्तमिस्रञ्च दक्षिणायनमेव च । उत्तरायणमेतस्माज्ज्योतिर्दानं प्रशस्यते । यस्मादूर्द्ध्वगमेतत्तु तमसश्चैव भेषजम् । तस्मादूर्द्ध्वगतेर्दाता भवेदत्रेति निश्चयः । देवास्तेजस्विनो यस्मात् प्रभावन्तः प्रकाशकाः । तामसा राक्षसाश्चैव तस्माद्दीपः प्रदीयते । आलोकदानाच्चक्षुष्मान् प्रभायुक्तो भवेन्नरः । तान् दत्त्वा नोपहिंसेत न हरेन्नोपनाशयेत् । दीपहर्त्ता भवेदन्धस्तमोगतिरसुप्रभः । दीपप्रदः स्वर्गलोके दीपमालेव राजते । हविषा प्रथमः कल्पो द्वितीयश्चौषधीरसैः । वसामेदोऽस्थिनिर्य्यासैर्न कार्य्यः पुष्टिमिच्छता । गिरिप्रपाते गहने चैत्यस्थाने चतुष्पथे । दीपदाता भवेन्नित्यं य इच्छेद्भूतिमात्मनः । कुलोद्द्योतो विशुद्धात्मा प्रकाशत्वञ्च गच्छति । ज्योतिषाञ्चैव सालोक्यं दीपदाता नरः सदा" दीपस्य शुभाशुभलक्षणम् वृ०सं० ८४अ० उक्तं यथा

"वामावर्त्तो मलिनकिरणः सस्फुलिङ्गोऽल्पमूर्त्तिः क्षिप्रं नाशं व्रजति विमलस्नेहवर्त्त्यन्वितोऽपि । दीपः पापं कथयति फलं शब्दवान् वेपनश्च व्याकीर्णार्चिर्विशलभमरुद्‌ यश्च नाशं प्रयाति । दीपः संहतमूर्त्तिरायततनुर्निर्वेपनो दीप्तिमान् निःशब्दोरुचिरः प्रदक्षिणगतिर्वैदूर्य्यहेमद्युतिः । लक्ष्मीं क्षिप्रमभिव्यनक्ति रुचिरं यश्चोद्यतं दीप्यते शेषं लक्षणमग्निलक्षणसमं योज्यं यथायुक्तितः"

"प्रवर्तितो दीप इव प्रदीपात्" "निशीथदीपाः सहसा हतत्विषः" रघुः । दीपयत्यर्थान् वा । २प्रकाशके यथा चित्तदीपादयः पञ्चदश्याम् ।

**दीपक** पु०त्रि०दीपयति स्वं परञ्चार्थं दीपि—ण्वुल् । स्वपरप्रकाशके स्त्रियां टाप् अतइत्त्वम् दीपिका । षट्कर्मदीपिका ज्योतिषदीपिका २प्रदीपे पु०३अलङ्कारभेदे अलङ्कारशब्दे ३९९पृ०दृश्यम् । ४यमान्यां रत्नमाला ५लोचमस्तके हच्चे शब्दरत्ना० अनयोरग्निदीपकत्वात् तथात्वम् ६कुङ्कुमे न०। ७खगशाहिणि(वाज)(सिकरा) प्रसिद्धे खगे पुंस्त्री हेमच०८मात्रावृत्तभेदे "तुरगैकमुपधाय सुनरेन्द्रमवधाय । इह दीपकमवेहि लघुमन्तमवधेहि" तल्लक्षणम् । ९रागभेदे पु० स च हनूमन्मते द्वितीयोरागः सूर्य्यनेत्रान्निर्गतः षड्जस्वराश्रयः ग्रीष्मर्त्तौ मध्याह्ने गेयः । क्षुद्रोदीपः ङीप् । स्वार्थे—क ह्रस्वः । दीपिका क्षुद्रदीपे "स शंवरारेर्वलिदीपिका इव" नैष० ।